दुर्गा सप्तशती — अध्याय 8

Durga Saptashati — Chapter 8

Source: Selected 1894 ancient core — chapter 8. Also compared: Opening — physical scan 202; Ending and colophon — physical scan 224; Verified 1894 imprint — physical scan 7; Ancient Sanskrit comparison only.

प्रारम्भ — वक्ता

SPEAKER

ऋषिरुवाच।

ṛṣiruvāca|

अध्याय 8 — रक्तबीज-वध

TEXT POSITION 1

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः॥

caṇḍe ca nihate daitye muṇḍe ca vinipātite|
bahuleṣu ca sainyeṣu kṣayiteṣvasureśvaraḥ||

TEXT POSITION 2

ततः कोपपराधीनचेताः शुम्भः प्रतापवान्।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह॥

tataḥ kopaparādhīnacetāḥ śumbhaḥ pratāpavān|
udyogaṃ sarvasainyānāṃ daityānāmādideśa ha||

TEXT POSITION 3

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः।
कम्बूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः॥

adya sarvabalairdaityāḥ ṣaḍaśītirudāyudhāḥ|
kambūnāṃ caturāśītirniryāntu svabalairvṛtāḥ||

Note: The printed numbers describe asura forces or groups in the story, not a modern headcount or community classification.

TEXT POSITION 4

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै।
शतं कुलानि धूम्राणां निर्गच्छन्तु ममाज्ञया॥

koṭivīryāṇi pañcāśadasurāṇāṃ kulāni vai|
śataṃ kulāni dhūmrāṇāṃ nirgacchantu mamājñayā||

TEXT POSITION 5

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः।
युद्धाय सज्जा निर्यान्तु चाज्ञया त्वरिता मम॥

kālakā daurhṛdā mauryāḥ kālakeyāstathāsurāḥ|
yuddhāya sajjā niryāntu cājñayā tvaritā mama||

TEXT POSITION 6

इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः॥

ityājñāpyāsurapatiḥ śumbho bhairavaśāsanaḥ|
nirjagāma mahāsainyasahasrairbahubhirvṛtaḥ||

TEXT POSITION 7

आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम्।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम्॥

āyāntaṃ caṇḍikā dṛṣṭvā tatsainyamatibhīṣaṇam|
jyāsvanaiḥ pūrayāmāsa dharaṇīgaganāntaram||

TEXT POSITION 8

ततः सिंहो महानादमतीव कृतवान्नृप।
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत्॥

tataḥ siṃho mahānādamatīva kṛtavānnṛpa|
ghaṇṭāsvanena tannādamambikā copabṛṃhayat||

TEXT POSITION 9

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा।
निनादैर्भीषणैः काली जिग्ये विस्तारिताननाः॥

dhanurjyāsiṃhaghaṇṭānāṃ nādāpūritadiṅmukhā|
ninādairbhīṣaṇaiḥ kālī jigye vistāritānanā||

TEXT POSITION 10

तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम्।
देवीसिंहस्तथा काली सरोषैः परिवारिताः॥

tanninādamupaśrutya daityasainyaiścaturdiśam|
devīsiṃhastathā kālī saroṣaiḥ parivāritāḥ||

TEXT POSITION 11

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम्।
भवायामरसिंहानामतिवीर्यबलान्विताः॥

etasminnantare bhūpa vināśāya suradviṣām|
bhavāyāmarasiṃhānāmativīryabalānvitāḥ||

TEXT POSITION 12

ब्रह्मेशगुहविष्णूनां तथैन्द्रस्य शक्तयः।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः॥

brahmeśaguhaviṣṇūnāṃ tathaindrasya śaktayaḥ|
śarīrebhyo viniṣkramya tadrūpaiścaṇḍikāṃ yayuḥ||

TEXT POSITION 13

यस्य देवस्य यद्रूपं यथाभूषणवाहनम्।
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ॥

yasya devasya yadrūpaṃ yathābhūṣaṇavāhanam|
tadvadeva hi tacchaktirasurānyoddhumāyayau||

TEXT POSITION 14

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते॥

haṃsayuktavimānāgre sākṣasūtrakamaṇḍaluḥ|
āyātā brahmaṇaḥ śaktirbrahmāṇī sābhidhīyate||

TEXT POSITION 15

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा॥

māheśvarī vṛṣārūḍhā triśūlavaradhāriṇī|
mahāhivalayā prāptā candrarekhāvibhūṣaṇā||

TEXT POSITION 16

कौमारी शक्तिहस्ता च मयूरवरवाहना।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी॥

kaumārī śaktihastā ca mayūravaravāhanā|
yoddhumabhyāyayau daityānambikā guharūpiṇī||

TEXT POSITION 17

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ॥

tathaiva vaiṣṇavī śaktirgaruḍopari saṃsthitā|
śaṅkhacakragadāśārṅgakhaḍgahastābhyupāyayau||

TEXT POSITION 18

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः।
शक्तिः साप्याययौ तत्र वाराही बिभ्रती तनुम्॥

yajñavārāhamatulaṃ rūpaṃ yā bibhrato hareḥ|
śaktiḥ sāpyāyayau tatra vārāhī bibhratī tanum||

TEXT POSITION 19

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥

nārasiṃhī nṛsiṃhasya bibhratī sadṛśaṃ vapuḥ|
prāptā tatra saṭākṣepakṣiptanakṣatrasaṃhatiḥ||

TEXT POSITION 20

वज्रहस्ता तथैन्द्री गजराजोपरि स्थिता।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा॥

vajrahastā tathaindrī gajarājopari sthitā|
prāptā sahasranayanā yathā śakrastathaiva sā||

TEXT POSITION 21

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम्॥

tataḥ parivṛtastābhirīśāno devaśaktibhiḥ|
hanyantāmasurāḥ śīghraṃ mama prītyāha caṇḍikām||

TEXT POSITION 22

ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी॥

tato devīśarīrāttu viniṣkrāntātibhīṣaṇā|
caṇḍikāśaktiratyugrā śivāśataninādinī||

TEXT POSITION 23

सा चाह धूम्रजटिलमीशानमपराजिता।
दूतत्वं गच्छ भगवन्पार्श्वं शुम्भनिशुम्भयोः॥

sā cāha dhūmrajaṭilamīśānamaparājitā|
dūtatvaṃ gaccha bhagavanpārśvaṃ śumbhaniśumbhayoḥ||

TEXT POSITION 24

ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः॥

brūhi śumbhaṃ niśumbhaṃ ca dānavāvatigarvitau|
ye cānye dānavāstatra yuddhāya samupasthitāḥ||

TEXT POSITION 25

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ॥

trailokyamindro labhatāṃ devāḥ santu havirbhujaḥ|
yūyaṃ prayāta pātālaṃ yadi jīvitumicchatha||

TEXT POSITION 26

बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः॥

balāvalepādatha cedbhavanto yuddhakāṅkṣiṇaḥ|
tadāgacchata tṛpyantu macchivāḥ piśitena vaḥ||

TEXT POSITION 27

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम्।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता॥

yato niyukto dautyena tayā devyā śivaḥ svayam|
śivadūtīti loke'smiṃstataḥ sā khyātimāgatā||

TEXT POSITION 28

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः।
अमर्षापूरिता जग्मुर्यतः कात्यायनी स्थिता॥

te'pi śrutvā vaco devyāḥ śarvākhyātaṃ mahāsurāḥ|
amarṣāpūritā jagmuryataḥ kātyāyanī sthitā||

TEXT POSITION 29

ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः।
ववर्षुरुद्यतामर्षास्तां देवीममरारयः॥

tataḥ prathamamevāgre śaraśaktyṛṣṭivṛṣṭibhiḥ|
vavarṣurudyatāmarṣāstāṃ devīmamarārayaḥ||

TEXT POSITION 30

सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान्।
चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः॥

sā ca tānprahitānbāṇāñchūlaśaktiparaśvadhān|
ciccheda līlayādhmātadhanurmuktairmaheṣubhiḥ||

TEXT POSITION 31

तस्याग्रतस्तथा काली शूलपातविदारितान्।
खट्वाङ्गपोथितांश्चान्यान्कुर्वती व्यचरत्तदा॥

tasyāgratastathā kālī śūlapātavidāritān|
khaṭvāṅgapothitāṃścānyānkurvatī vyacarattadā||

Note: The selected print reads अग्रतस्, rather than the comparison's आयतस्; the spatial wording follows the selected text.

TEXT POSITION 32

कमण्डलुजलाक्षेपहतवीर्यहतोऽजसः।
ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति॥

kamaṇḍalujalākṣepahatavīryahato'jasaḥ|
brahmāṇī cākarocchatrūnyena yena sma dhāvati||

TEXT POSITION 33

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी।
दैत्यान् जघान कौमारी तथा शक्त्यातिकोपना॥

māheśvarī triśūlena tathā cakreṇa vaiṣṇavī|
daityān jaghāna kaumārī tathā śaktyātikopanā||

TEXT POSITION 34

ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः।
पेतुर्विदारिताः भूमौ रुधिरौघप्रवर्षिणः॥

aindrīkuliśapātena śataśo daityadānavāḥ|
peturvidāritāḥ bhūmau rudhiraughapravarṣiṇaḥ||

TEXT POSITION 35

तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः।
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः॥

tuṇḍaprahāravidhvastā daṃṣṭrāgrakṣatavakṣasaḥ|
vārāhamūrtyā nyapataṃścakreṇa ca vidāritāḥ||

TEXT POSITION 36

नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान्।
नारसिंही चचाराजौ नादपूर्णदिगम्बरा॥

nakhairvidāritāṃścānyānbhakṣayantī mahāsurān|
nārasiṃhī cacārājau nādapūrṇadigambarā||

TEXT POSITION 37

चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः।
पेतुर्विदारिताः भूमौ तांश्चखादाथ सा तदा॥

caṇḍāṭṭahāsairasurāḥ śivadūtyabhidūṣitāḥ|
peturvidāritāḥ bhūmau tāṃścakhādātha sā tadā||

Note: The selected print describes the asuras as विदारिताः भूमौ; the comparison uses different falling wording.

TEXT POSITION 38

इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान्।
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः॥

iti mātṛgaṇaṃ kruddhaṃ mardayantaṃ mahāsurān|
dṛṣṭvābhyupāyairvividhairneśurdevārisainikāḥ||

TEXT POSITION 39

पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान्।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः॥

palāyanaparāndṛṣṭvā daityānmātṛgaṇārditān|
yoddhumabhyāyayau kruddho raktabījo mahāsuraḥ||

TEXT POSITION 40

रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः।
समुत्पतति मेदिन्यास्तत्प्रमाणो महासुरः॥

raktabinduryadā bhūmau patatyasya śarīrataḥ|
samutpatati medinyāstatpramāṇo mahāsuraḥ||

TEXT POSITION 41

युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत्॥

yuyudhe sa gadāpāṇirindraśaktyā mahāsuraḥ|
tataścaindrī svavajreṇa raktabījamatāḍayat||

TEXT POSITION 42

कुलिशेनाहतस्याशु बहु सुस्राव शोणितम्।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः॥

kuliśenāhatasyāśu bahu susrāva śoṇitam|
samuttasthustato yodhāstadrūpāstatparākramāḥ||

TEXT POSITION 43

यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः॥

yāvantaḥ patitāstasya śarīrādraktabindavaḥ|
tāvantaḥ puruṣā jātāstadvīryabalavikramāḥ||

TEXT POSITION 44

ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम्॥

te cāpi yuyudhustatra puruṣā raktasaṃbhavāḥ|
samaṃ mātṛbhiratyugraśastrapātātibhīṣaṇam||

TEXT POSITION 45

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः॥

punaśca vajrapātena kṣatamasya śiro yadā|
vavāha raktaṃ puruṣāstato jātāḥ sahasraśaḥ||

TEXT POSITION 46

वैष्णवी समरे चैनं चक्रेणाभिजघान ह।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम्॥

vaiṣṇavī samare cainaṃ cakreṇābhijaghāna ha|
gadayā tāḍayāmāsa aindrī tamasureśvaram||

TEXT POSITION 47

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः॥

vaiṣṇavīcakrabhinnasya rudhirasrāvasaṃbhavaiḥ|
sahasraśo jagadvyāptaṃ tatpramāṇairmahāsuraiḥ||

TEXT POSITION 48

शक्त्या जघान कौमारी वाराही च तथासिना।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम्॥

śaktyā jaghāna kaumārī vārāhī ca tathāsinā|
māheśvarī triśūlena raktabījaṃ mahāsuram||

TEXT POSITION 49

स चापि गदया दैत्यः सर्वा एवाहनत्पृथक्।
मातॄः कोपसमाविष्टो रक्तबीजो महासुरः॥

sa cāpi gadayā daityaḥ sarvā evāhanatpṛthak|
mātṝḥ kopasamāviṣṭo raktabījo mahāsuraḥ||

TEXT POSITION 50

तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः॥

tasyāhatasya bahudhā śaktiśūlādibhirbhuvi|
papāta yo vai raktaughastenāsañchataśo'surāḥ||

TEXT POSITION 51

तैश्चासुररक्तसंभूतैरसुरैः सकलं जगत्।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम्॥

taiścāsuraraktasaṃbhūtairasuraiḥ sakalaṃ jagat|
vyāptamāsīttato devā bhayamājagmuruttamam||

TEXT POSITION 52

तान्विषण्णान्सुरान्दृष्ट्वा चण्डिका प्राह सत्वरा।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु॥

tānviṣaṇṇānsurāndṛṣṭvā caṇḍikā prāha satvarā|
uvāca kālīṃ cāmuṇḍe vistīrṇaṃ vadanaṃ kuru||

TEXT POSITION 53

मच्छस्त्रपातसंभूतान्रक्तबिन्दून्महासुरान्।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता॥

macchastrapātasaṃbhūtānraktabindūnmahāsurān|
raktabindoḥ pratīccha tvaṃ vaktreṇānena vegitā||

Note: The selected main text has वेगिता; the comparison has वेगिना. The meaning stays within the secure action rather than silently substituting the alternative.

TEXT POSITION 54

भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान्।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति॥

bhakṣayantī cara raṇe tadutpannānmahāsurān|
evameṣa kṣayaṃ daityaḥ kṣīṇarakto gamiṣyati||

TEXT POSITION 55

भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम्॥

bhakṣyamāṇāstvayā cogrā na cotpatsyanti cāpare|
ityuktvā tāṃ tato devī śūlenābhijaghāna tam||

TEXT POSITION 56

मुखेन काली जगृहे रक्तबीजस्य शोणितम्।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम्॥

mukhena kālī jagṛhe raktabījasya śoṇitam|
tato'sāvājaghānātha gadayā tatra caṇḍikām||

TEXT POSITION 57

न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम्॥

na cāsyā vedanāṃ cakre gadāpāto'lpikāmapi|
tasyāhatasya dehāttu bahu susrāva śoṇitam||

TEXT POSITION 58

यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः॥

yatastatastadvaktreṇa cāmuṇḍā saṃpratīcchati|
mukhe samudgatā ye'syā raktapātānmahāsurāḥ||

TEXT POSITION 59

तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम्।
देवी शूलेन वज्रेण बाणैरसिभे ऋष्टिभिः॥

tāṃścakhādātha cāmuṇḍā papau tasya ca śoṇitam|
devī śūlena vajreṇa bāṇairasibhe ṛṣṭibhiḥ||

Note: The selected print has the irregular असिभे. It is disclosed rather than silently changed to a familiar weapon form.

TEXT POSITION 60

जघान रक्तबीजं तं चामुण्डापीतशोणितम्।
स पपात महीपृष्ठे शस्त्रसमूहसमाहतः॥

jaghāna raktabījaṃ taṃ cāmuṇḍāpītaśoṇitam|
sa papāta mahīpṛṣṭhe śastrasamūhasamāhataḥ||

TEXT POSITION 61

नीरक्तश्च महीपाल रक्तबीजो महासुरः।
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप॥

nīraktaśca mahīpāla raktabījo mahāsuraḥ|
tataste harṣamatulamavāpustridaśā nṛpa||

HALF-VERSE 62

हते मातृगणस्तस्मिन्ननर्तासृङ्मदोद्धतः॥

hate mātṛgaṇastasminnanartāsṛṅmadoddhataḥ||

समापन — पुष्पिका

COLOPHON

इति श्रीमार्कण्डेयपुराणे देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः॥८॥

iti śrīmārkaṇḍeyapurāṇe devīmāhātmye raktabījavadho nāmāṣṭamo'dhyāyaḥ||8||